This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



3244

॥प्रथम पंचिका॥

Acc. No. ~~3244~~. M-1891

Title - ऐतरेय ब्राह्मण - (पञ्चिका - 1)

Author - ?

Date - शके 1681

Sub - वेद, ब्राह्मण.

folio - 34.

Xerox - 67

Checkod 2012

KKSU LIBRARY
RAMTEK
441 106
M-1891
Dist Nagpur

१

॥श्रीगणेशाय नमः॥ हरिः ॐ॥ ॥अग्निर्वै देवानामवमो विष्णुः परम
स्तदंतरेण सर्वा अन्या देवता आग्नावैष्णवं पुरोळाशं निर्वपंति दीक्षणी
यमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योनंतरायं निर्वपंत्यग्निर्वै स
र्वा देवता विष्णुः सर्वा देवता एते वै यज्ञस्यांत्ये तन्वौ यदग्निश्च विष्णुश्च
यदाग्नावैष्णवं पुरोळाशं निर्वपंत्यंतत एव तद्देवानृध्नुवंति तदाहुर्य
देकादशकपालः पुरोळाशो द्वावग्नाविष्णू कैनयोः स्तत्र क्लृप्तिः का विभ
क्तिरित्यष्टाकपाल आग्नेयोष्टाक्षरा वै गायत्री गायत्रमग्नेश्छंदस्त्रिक

र्व्य

पालो वैष्णवस्त्रिर्हीदं विष्णुर्व्यक्रमत सैनयोस्तत्र क्लृप्तिः सा विभक्तिः घृते चरुं नि

र्वपेत योऽप्रतिष्ठितो मन्येतास्यां वाव स न प्रतितिष्ठति यो न प्रतितिष्ठतिं त व्य

धृ घृतं तत्स्त्रियै पयो ये तंडुलास्ते पुंसस्तन्मिथुनं मिथुनेनैवैनं तत्प्रजया पशुभि

प्रजनयति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेदारब्धयज्ञो वा एष आर

ब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषा पौर्णमासे

न वा तस्मिन्नेव हविषि तस्मिन्बर्हिषि दीक्षेतैषो एका दीक्षा सप्तदश सामिधेनी

रनुब्रूयात्सप्तदशो वै प्रजापतिर्द्वादश मासाः पंचर्तवो हेमंतशिशिरयोः सम

3

२

सेनतावासंवत्सरः संवत्सरः प्रजापतिः प्रजापतेरायतनाभिरेवाभीराध्नोति य एवं
वेद ॥१॥ ॥यज्ञो वै देवेभ्य उदक्रामत्तमिष्टिभिः प्रैषमैछन्यदिष्टिभिः प्रैषमैछं
स्तदिष्टीनामिष्टित्वं तमन्वविंदन्ननुवित्तयज्ञो राध्नोति य एवं वेदाहूतयो वै ना
मैता यदाहुतय एताभिर्वै देवान्यजमानो ह्वयति तदाहुतीनामाहुतित्वमूतयः
खलु वै नाम याभिर्देवा यजमानस्य हवमायंति ये वै पंथानो याः स्रुतयस्ता
वा ऊतयस्त उ एवैतत्स्वर्गीयाणायजमानस्य नयंति तदाहुर्यदन्यो जुहोत्यथ
योनुब्रूते यजति च कस्मात्तं होतेत्याचक्षत इति यद्वाव स तत्र यथाभाजनं देव

२

लाअमुमावहामुमावहेत्यावाहयतितद्देवहोतुर्होतृत्वंहोताभवतिहोतेत्येनमाचक्षतेयएवंवेद॥२॥ ॥पुनर्वाएतमृत्विजोगर्भंकुर्वंतियंदीक्षयंत्यद्भिरभिषिंचंतिरेतोवाआपःसरेतसमेवैनंतत्कृत्वादीक्षयंतिनवनीतेनाभ्यंजंत्याज्यंवैदेवानांसुरभिघृतंमनुष्याणामायुतंपितृणांनवनीतंगर्भाणांतद्यन्नवनीताभ्यंजंतिस्वेनैवैनंतद्भागधेयेनसमर्द्धयंत्यांजंत्येनंतेजोवाएतदक्ष्योर्यदांजनंसतेजसमेवैनंतत्कृत्वादीक्षयंत्येकविंशत्यादर्भपिंजूलैःपावयंतिशुमेवैनंतत्पूतंदीक्षयंतिदीक्षितविमितंप्रपादयंतियोनिर्वाएषादीक्षितस्य

३

दीक्षितविमितंयोनिमेवैनंतत्स्वांप्रपादयंतितस्माद्ध्रुवाद्योनेरास्तेचचरतिचतस्मा
द्ध्रुवाद्योनेर्गर्भाधीयंतेचप्रचजायंतेतस्माद्दीक्षितंनांन्यत्रदीक्षितविमितादादि
त्योभ्युदियाद्वाभ्यस्तमियाद्वापिवाभ्याश्रावयेयुर्वाससाप्रोर्णुवंत्युल्बंवाएतद्दी
क्षितस्ययद्वासउल्बेनैवैनंतत्प्रोर्णुवंतिकृष्णाजिनमुत्तरंभवत्युत्तरंवाउल्बा
ज्जरायुजरायुणैवैनंतत्प्रोर्णुवंतिमुष्टीकुरुतेमुष्टीवैकृत्वागर्भोंतःशेतेमुष्टीकृ
त्वाकुमारोजायतेतद्यन्मुष्टीकुरुतेयज्ञंचैवतत्सर्वाश्चदेवतामुष्ट्योःकुरु
तेतदाहुर्नपूर्वदीक्षिणःसंसवोस्तिपरिगृहीतोवाएतस्ययज्ञःपरिगृहीता

३

6

द्दैवतानैतस्यांतिरस्करपरहीसंगाएवंयथानयेस्रुन्नुचंरुस्याजिनमवभृथमा
वेतितस्मान्नुकागर्भोजरा योर्जायंतेसहैववाससाम्यवैतितस्मात्सहैवो
ल्बेनकुमारोजायते॥३॥ ॥तमग्नेसप्रथाअसिसोमयास्तेमयोभुवइत्या
ज्यभागयोःपुरोनुवाक्येअनुब्रूयाद्यःपूर्वमनीजानस्यात्तस्मैत्वयायज्ञं
वइतियस्तमेवास्याएनहितनोसंग्निःप्रत्नेनमन्मनासोमगीर्भिष्ट्वावयमितिद
पूर्वमीजानस्यात्तस्मैप्रत्नमितिपूर्वंकर्माभिवदतितत्त्वाहस्यमग्निरंशांतांजेय
नत्वंसोमासिसत्पतिरितिवार्त्रघ्नावेवकुर्याद्धंवाएनद्दतियइसउपनमतिन

म्माहार्षंप्राणेवकुर्ज्यावग्निर्मुखंप्रथमोदेवतानामग्निश्चविष्णोतपउत्तमंमहइत्या
ग्नावैष्णवस्यहविषोयाज्यानुवाक्येभवतआग्नावैष्णव्यौरूपसमृद्धेएतद्वैयज्ञस्य
समृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदत्यग्निश्चहवैविष्णुश्चदेवानांदीक्षा
पालौतौदीक्षायाईशातेतद्यदाग्नावैष्णवंहविर्भवतियौदीक्षायाईशातेतौप्रीतौ
दीक्षांप्रयच्छतांयौदीक्षयितारौतौदीक्षयेतामितित्रिष्टुभौभवतःसेंद्रियत्वाय॥४॥ ॥
गायत्र्यौस्विष्टकृतःसंयाज्ये—कुर्वीततेजस्कामोब्रह्मवर्चसकामस्तेजोवैब्रह्म
वर्चसंगायत्रीतेजस्वीब्रह्मवर्चसीभवतियएवंविद्वान्गायत्र्यौकुरुतेउष्णिहावायुः

कामः कुर्वीता [illegible] युर्दण्ड सिक्र सर्वमायुरेति य एवं विद्वानुषसि सौ कुरुते जुहोमौ स्व
र्गकामः कुर्वीत द्यौ वी मनु जुहुमोः श्रनुप हि रद्द राशि त्रय इ मऊ धीरिवं [illegible]
लोकान् के विंशाये कविंशा यैवेमाल्लोकान्यो हति स्वर्गा एव लोके च जुहु [illegible] तमन
प्रतितिष्ठति प्रतितिष्ठति य एवं विद्वान जुहुमौ कुरुते हृह स्यौ श्री कामाय श्र
मः कुर्वीत श्री वैयशश्छंद सा हरती श्रियमेव यशश्चात्मं च चेतयर्थ वि[illegible]
द्वौ कुरुते पशुकामा य यज्ञ कामः कुर्वीत पाङ्क्तो वै यज्ञ उपैनं यज्ञो नमति य एवं वि[illegible]
कुरुते त्रिष्टुभौ वीर्यकामः कुर्वीतौजो वा इन्द्रियं वीर्यं त्रिष्टुप् ओज एव वीर्यं [illegible]

प

वान्भवतियएवंविद्वांस्त्रिष्टुभौकुरुतेजगत्यौपशुकामःकुर्वीतजागतावैप
शुमान्भवतियएवंविद्वान्जगत्यौकुरुतेविराजावन्नाद्यकामःकुर्वीता
न्नंवैविराट्तस्माद्यस्यैवेहभूयिष्ठमन्नंभवतिसएवभूयिष्ठंलोकेविराजतितद्विराजोविरा
विस्वेषुराजतिश्रेष्ठःस्वानांभवतियएवंवेद॥५॥ ॥अथोपंचवीर्यंवाएतच्छंदो
यद्विराड्यत्त्रिपदातेनोष्णिहागायत्र्यौयदस्याएकादशाक्षराणिपदानितेनत्रिष्टु
ब्यत्त्रयस्त्रिंशदक्षरातेनानुष्टुम्नवाएकेनाक्षरेणछंदांसिवियंतिनद्वाभ्यांयद्विरा
ट्तत्पंचमंसर्वेषांछंदसांवीर्यमवरुंधेसर्वेषांछंदसांवीर्यमश्नुतेसर्वेषांछंदसांसा

शुश्रूषं सत्यं नासत्तो व्रतामश्नुते न्नाहोत्रपतिर्मैव यश्नुते प्रजयान्नाद्यं य एवं विद्वान्विर
जो जुरुतैनस्माद्विराजा वै वैरूतं व्यैमेधो स्रनइ मोस्रनइ सेतैस्रू तं वावरोहा सह्मं
दीक्षोत स्माद्दीक्षितेनैव सत्यमेव वदितव्यं स घोरव्रत्याहुः कोऽर्हति मनुष्यः सर्वं सत्यं
वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति विचक्षणवतीं वाचं वदेच्चक्षु
र्वै विचक्षणं वि ह्येनेन पश्यती सेतद्वै मनुष्येषु सत्यं निहितं यच्चक्षुस्तस्मादाचक्षा
णमाहुरद्रागिति स यद्यदर्शमित्याहाथास्य श्रद्दधति यद्यु वै स्वयं पश्यति न बहू
नां च नान्येषां श्रद्दधाति तस्माद्विचक्षणवतीमेव वाचं वदेत्सत्योत्तरा हैवास्य वागु

27

दिताभवतिभवति॥६॥ इतिप्रथमपंचिकायांप्रथमोध्यायः॥१॥ ॥ स्वर्गंवाएतेन
लोकमुपप्रयंतियत्प्रायणीयस्तत्प्रायणीयस्यप्रायणीयत्वंप्राणोवैप्रायणीयउदानउ
दयनीयःसमानोहोताभवतिसमानौहिप्राणोदानौप्राणानांकॢप्त्यैप्राणानांप्रतिप्र
ज्ञात्यैयज्ञोवैदेवेभ्यउदक्रामत्तेदेवानकिंचनाशक्नुवन्कर्त्तुंनप्राजानंस्तेब्रुवन्नदितिंत्व
येमंयज्ञंप्रजानामेतिसातथेत्यब्रवीत्सावैवोवरंवृणाइतिवृणीष्वेतिसैतमेववर
मवृणीतमत्प्रायणायज्ञाःसंतुमदुदयनाइतितथेतितस्मादादित्यश्चरुःप्रायणी
योभवत्यादित्यउदयनीयोवरवृतोह्यस्याअथोएतंवरमवृणीतमयैवप्राचींदिश

प्रज्ञानाथाग्निनादक्षिणांसोमेनप्रतीचींसवित्रोदीचीमितिपथ्यांयजतियत्पथ्यांयजति
तस्मादसौपुरउदेतिपश्चास्तमेतिपथ्यांह्येषोनुसचरत्यग्निंयजतियदग्निंयजति
तस्माद्दक्षिणतोग्नओषधयःपच्यमानाआयंत्याग्नेय्योह्योषधयःसोमंयजतियत्सोमंय
जतितस्मात्प्रतीच्योआपोबह्व्यःस्यंदंतेसौम्याह्यापःसवितारंयजतियत्सवितारंयज
तितस्मादुत्तरतःपश्चादयंभूयिष्ठंपवमानःपवतेसवितृप्रसूतोह्येषएतत्पवतेउत्त
मामदितिंयजतियदुत्तमामदितिंयजतितस्मादसाविमांवृष्ट्याभ्युनत्त्यस्मिञ्जिघर्तिपंचदे
वतायजतिपांक्तोयज्ञःसर्वादिशःकल्पंतेकल्पतेयज्ञोपितस्यैजनतायैकल्पतेयत्रैवंवि

13

७

द्यान्यैताम्भवति॥७॥ ॥यस्तेजोब्रह्मवर्च्चसमिछेत्स याज्ञाहुतिभिः प्राङ् सइयात्तेजोवैब्रह्म
वर्च्चसंप्राचीदिक्तेजस्वीब्रह्मवर्च्चसीभवतियएवंविद्वान्प्राङेतियोन्नाद्यमिछेत्स याज्ञाहुति
भिर्दक्षिणासइयादन्नादोवाएषोन्नपतिर्यदग्निरन्नादोन्नपतिर्भवत्यश्नुतेप्रजयान्नाद्यं
यएवंविद्वान्दक्षिणोतियःपशून्निछेत्स याज्ञाहुतिभिःप्रत्यङ्सइयात्पशवोवाएतेयदापः
पशुमान्भवतियएवंविद्वान्प्रत्यङेतियःसोमपीथमिछेत्स याज्ञाहुतिभिरुदङ्सइयादु
त्तराहवैसोमोराजाप्रसोमपीथमाप्नोतियएवंविद्वानुदङेतिस्वर्ग्यैवोर्ध्वादिक्सर्वासुदिक्षु
राध्नोतिसम्यंचोवाइमेलोकाःसम्यंचोस्माइमेलोकाःश्रियैदीध्यतियएवंवेदपर्यायजा

७

यत्पथ्यां यजति वाचमेवतद्यज्ञमुखे संभरति प्राणापानावग्नीषोमौ प्रसवाय सविता प्रतिष्ठि
त्या अदितिः पथ्यामेव यजति यत्पथ्यामेव यजति वाचैव तद्यज्ञं पथामपिनयति चक्षुषी
एवाग्नीषोमौ प्रसवाय सविता प्रतिष्ठित्या अदितिः चक्षुषा वै देवा यज्ञं प्राजानंश्चक्षुषा वा
एतत्प्रज्ञायते यदप्रज्ञेयं तस्मादपि मुग्धश्चरित्वा यदैवानुष्ठ्या चक्षुषा प्रजानात्यथ प्रजा
नाति यद्वै तद्देवा यज्ञं प्राजानन्नस्यां वाव तत्प्राजानन्नस्यां समभरन्नस्यै वै यज्ञस्तायतेस्यै
क्रियतेस्यै संभ्रियत इयं ह्यदितिस्तदुत्तमामदितिं यजति यदुत्तमामदितिं यजति यज्ञ
स्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥८॥ ॥ देवविशः कल्पइतव्या इत्याहुस्ताः कल्प

15

८

ना

[illegible]नुष्यविशः कल्पंताम् इति सर्वा विशः कल्पंते कल्पंतेऽस्या[illegible]पि यस्यै जनतायै कल्पंते य
वं विद्वान्होता भवति स्वस्ति नः पथ्यासु धन्वस्वित्यसाह्स्वस्त्यप्सु वृजने स्वर्वति ॥ स्वस्ति नः पुत्रकृ
थेषु योनिषु स्वस्ति राये मरुतो दधातनेति मरुतो वै देवानां विशस्ता एवैतद्यज्ञमुखेऽचीक्लृ
पत् सर्वैश्छंदोभिर्यजेदित्याहुः सर्वैर्वै छंदोभिरिष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमा
नः सर्वैश्छंदोभिरिष्ट्वा स्वर्गं लोकं जयति स्वस्ति नः पथ्यासु धन्वसु ॥ स्वस्तिरिद्धि प्रपथे
श्रेष्ठेति पथ्यायाः स्वस्तेस्त्रिष्टुभावग्ने नय सुपथा राये अस्मानादेवानामपि पंथामगन्म
त्याग्ने त्रिष्टुभौ त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्यामिति सोमस्य त्रि

९

हु मा वा विश्वदेवं सत्पतिं यज्ञमा विश्वाऽजा जानीति सवितुर्गायत्र्यौ सत्रा मा तां दधि
वीं धामने रसं महीमू षु मातरं सुव्रतानामिसदितेऽगा सोवेतानि वावसर्वाणि छं
दांसि गायत्रं त्रैष्टुभंऽजागतमन्वायांत्येतानि हि यज्ञे प्रतमामिव क्रियंत एतैर्वा अस्य
छंदोभिर्यजतः सर्वैश्छंदोभिरिष्टं भवति य एवं वेद ॥७॥ ॥ता वा एताः प्रत्रयौ
नेत्तमसः पथिमसैः स्वस्तिमसएतस्य हविषो याज्यानुवाक्या एताभिर्वा इष्ट्वा दे
वाः स्वर्गं लोकमजयंस्तथैवैतद्यजमान एताभिरिष्ट्वा स्वर्गं लोकं जयति तासप
हमास्तं साशिरायेमरुतो ह यातनेति मरुतो ह वै देवविशोंऽतरिक्षभाजनास्तेभ्यो

१८

ऋत्योनि वैयः स्वर्गं लोकमेतीश्वराहैनं प्रवारोढ्रोर्विवामपितोः सयदाह स्वस्तिरायेम
रुतोद्घातनेतितमरुत्रो देवविड्यो यजमानं निवेदयतिन ह वा एनं मरुतो देववि
शः स्वर्गं लोकं यंतं निरुंधतेन विमथ्नते स्वस्ति हैनमसर्जंति स्वर्गं लोकमभियाः
वं येदविराजावेतस्य हविषः स्विष्टकृतः संयाज्ये स्यातां येत्रयस्त्रिंशदक्षरे ॥ सेदमि
रग्नीरससत्वन्यांल्लोहग्नि यौ वतुष्पतो निपातीसेतै विराड्भ्यां वा इद्वादेवाः स्वर्गं लोकम
जयंस्तथैवैतद्यजमानो विराड्भ्यामिद्धा स्वर्गं लोकं जयति त्रयस्त्रिंशदक्षरे भवे
तं स्तु यस्त्रिंश ह्रै देवाश्च हौ वसवे एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कार

१८

र्थंतत्प्रथमेयज्ञमुखेदेवतांअक्षरभाजःकरोतिसदक्षरेणाक्षरेणैवतद्देवतांप्रीणातिद्वि
पात्रेणैवतद्देवतास्तर्पयति॥१०॥ ॥प्रयाजवदननुयाजंकर्त्तव्यंप्रायणीयमित्याहुर्ही
नमिववाएतदीखितमिवयत्प्रायणीयस्यानुयाजाइतितत्तन्नादृत्यंप्रयाजवदेवानुया
जवत्कर्त्तव्यंप्राणावैप्रयाजाःप्रजानुयाजायत्प्रयाजानंतरियात्प्राणांस्तद्यजमानस्या
तरियाद्यदनुयाजानंतरियात्प्रजांतद्यजमानस्यांतरियात्तस्मात्प्रयाजवदेवानुयाज
वत्कर्त्तव्यंपत्नीर्नसंयाजयेत्संस्थितयजुर्नजुहुयात्तावतैवयज्ञोसंस्थितःप्रायणीयस्य
निष्कासंनिदध्यात्तमुदयनीयेनाभिनिर्वपेद्यज्ञस्यसंतत्यैयज्ञस्याव्यवच्छेदायाथोखलु

19

यआभेरस्तान्यो प्रायणीयन्निर्वपेत्तस्यामुदयनीयन्निर्वपेत्तावतैव यज्ञः संततोऽव्य
वच्छिन्नो भवत्यमुष्मिन्वा एतेन लोके राध्नुवन्तीत्यस्मिन्नित्याहुर्यत्प्रायणीयमिति प्राय
णीयमिति निर्वपंति प्रायणीयमिति चरंति प्रयंत्येवास्माल्लोकाद्यजमाना इत्यसन्निय
येव तदाहुर्व्यतिषजेद्याज्यानुवाक्या याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीय
स्य याज्याः कुर्याद्या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात्तद्व्य
तिषजत्युभयोर्लोकयोरृध्या उभयोर्लोकयोः प्रतिष्ठित्या उभयोर्लोकयोरृध्नोत्यु
भयोर्लोकयोः प्रतितिष्ठति प्रतितिष्ठति य एवं वेदादित्यश्चरुः प्रायणीयो भवत्या

दि सउदयनीयो यज्ञस्य च्छैयज्ञस्यवसैन च्यैयज्ञस्यो प्रस्तं सायंतद्यथैवादः ११ तिहस्मा
ह्येतेजग्या उभयतो नयोर प्रस्तं सायवसौनह्यसेवमेवैतद्यज्ञस्योभयतो रश्मीन्त्योरश्मी
सायवसौनिह्यानि यद्वादि सश्चरुः प्रायणीयोमवेसाद्दिसउदयनीयो पथ्यायैव स्व
स्ता प्रयंति पथ्यां स्वस्तिमभ्युद्यंति स्वस्तौवेतः प्रयंति स्वस्त्युद्यंति स्वस्त्युद्यंति । ११ ।
॥ इति प्रथमपंचिकायां द्वितीयोध्यायः ॥ हरिः ॐ ॥ ॥ प्राच्यां वै दिशि देवाः सो
मं राजानमक्रीणांस्तस्मात्प्राच्यां दिशि क्रीयते तं त्रयोदशान्मासादक्रीणंस्तस्मात्त्रयो
दशो मासो नानुविद्यते न वै सोमविक्रय्यनुविद्यते पापो हि सोमविक्रयी तस्यैं मनुष्या
क्रीतस्य

११

न्मृत्युपावर्तमानस्य दिशो वीर्याणींद्रियाणि व्युदसीदंस्तान्येकयर्चा वारुरुत्संततानि नाश
क्नुवंस्तानि द्वाभ्यां तानि तिसृभिस्तानि चतसृभिस्तानि पंचभिस्तानि षड्भिस्तानि सप्त
भिर्नैवावारुंधत तान्यष्टाभिरवारुंधताष्टाभिराश्नुवत यदष्टाभिरवारुंधताष्टाभि
राश्नुवत तदष्टानामष्टत्वमश्नुते यद्यत्कामयते य एवं वेद तस्मादेतेषु कर्मस्वष्टावष्टा
वनूच्यंतेंद्रियाणां वीर्याणामवरुद्ध्यै ॥१२॥ ॥ सोमाय क्रीताय प्रोह्यमाणायानुब्रूही
त्याहाध्वर्युर्मेगादभिश्रेयः प्रेही सन्वाऽयं वाव लोकोमुष्मात्तस्मादसावेव लोकः श्रेयान्
तमेवतं लोकं यजमानं गमयति बृहस्पतिः पुरएता ते अस्त्वित्याह ब्रह्म वै बृहस्पतिर्ब्रह्मै

११

वास्मा एतत्सुरो गवंमकर्णा वै अलन एव द्विष्येस पेमव स्ववरस्त्राह ष्विव्याहूतिं देवयजन

वैवरं ह षिय्यै देवयजन एवैनं तद्देव सायप्सारे शत्रून्स्तृणुह्रि सर्ववीरऽ तिद्विष

तमेवास्यैत साम्मानेम्रातृव्यमप बाधते घरं पादयति सोमयास्तेमयोभुव [illegible] तित्वं २

सौम्यं गायत्रमन्वाह सोमे राजनि प्रोह्यमाणे स्वयैवैनं तद्देवतयास्वेन छंद सासम ऋ

यति सर्वैनं दंतियशसागतेने सन्वाह यशो वै सोमो राजा सर्वो ह्वा एतेन क्रीयमा

णेन नंदति यश्चयज्ञेलप्स्यमानो भवति यश्चन सभासाहेन सख्या सखायमृ

त्येप वै आध्यष्ठानां सभासाहः सखायत्सोमो राजा किल्बिषस्पृदि सेषउ एवकि

१२

ल्बिषस्थेयो वै भवति यश्श्रेष्ठतामश्नुते स किल्बिषं भवति तस्मादु ह मानुषो ऽपा
प्रचारीः किल्बिषं नु मा यातयं निति पितुषणिरिसंनं वै पितुर्दक्षिणा वै पितुस्ता
मेनेन सनो संनसनिमेवैनं तत्करोसरंहितो भवति वाजिनायेतीद्रियं वै वीर्यं वा
जिनभाजरसंहास्मै वाजिनं नापच्छिद्यते य एवं वेद सोगं देवहू सन्चाहांगालोहि
नहिं भवस्यनुमिर्वर्द्धतु स्वयमिस्यतवो वै सोमस्य राज्ञो राजभ्रातरो यथा मनुष्य
स्यतैरेवैनं तत्सहागमयति दंधातु नः सविता सुप्रजामिषमिसाशिषमाशास्ते
सनः सपाभिरह्मिभिश्च जिनवविसह्णानि वाभ्राहानि रात्रयः सपा अहोरात्रै

१२

रेवास्माएतामाशिषमाशास्तेप्रजावंतंरयिमस्मेसमिन्वतिसाशिषमेवाशास्तेयातेधामा
निहविषायजंतीत्यन्वाहतातेविश्वापरिभूरस्तुयज्ञं॥गयस्फानःप्रतरणःसुवीर
तिगवान्नस्फावयितापतारैनैधीसेवनदाहावीरहाप्रचरासोमदुर्यानितिगृहा
वैदुर्याबिभ्यतिवैसोमाद्राज्ञआयतोयजमानस्यगृहाःसयदेतामन्वाहशांत्यैवैनं
तच्छमयतिसोस्यशांतोनप्रजांनपशून्हिनस्तीमांधियंशिक्षमाणस्यदेवेतिवारु
रायापरिदधातिवरुणादेवसोवाएषतावद्यावदुपनद्धोयावत्परिश्रितानिप्रपद्यते
स्वयैवैनंतद्देवतयास्वेनछंदसासमर्द्धयतिशिक्षमाणस्यदेवेतिशिक्षतेवाए [illegible]

१३

यजतेक्रतुंदक्षंवरुणसंशिशाधीतिवीर्यंप्रज्ञानंवरुणसंशिशाधीत्येवंतदाहययातिविश्वा
दुरितातरेमसुतर्माणमधिनावंरुहेमेतियज्ञोवैसुतर्मानौःकृष्णाजिनंवैसुतर्मानौर्वा
ग्वैसुतर्मानौर्वाचमेवतदारुह्यतयास्वर्गंलोकमभिसंतरतिताएताअष्टावन्वाहरूप
समृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदतितासांत्रिःप्रथ
मामन्वाहत्रिरुत्तमांताद्वादशसंपद्यंतेद्वादशवैमासाःसंवत्सरःसंवत्सरःप्रजापतिःप्रजा
पत्यायतनाभिरेवाभीराध्नोतियएवंवेदत्रिःप्रथमांत्रिरुत्तमामन्वाहयज्ञस्यैवतद्बर्सौ
नह्यतिस्थेम्नेबलायाविस्रंसाय॥१३॥ ॥अन्यतरोनड्वान्युक्तःस्यादन्यतरोवि

१३

नः॥ आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥ किंनु मलं किमजिनं कि
मु श्मश्रूणि किं तपः॥ पुत्रं ब्रह्माण इछध्वं स वै लोकोवदावदः॥ अन्नं ह प्राणः
शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः॥ सखा ह जाया कृपणं ह दुहिता
ज्योतिर्ह पुत्रः परमे व्योमन्॥ पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं॥ त
स्यां पुनर्नवो भूत्वा दशमे मासि जायते॥ तज्जाया जाया भवति यदस्यां
जायते पुनः॥ आभूतिरेषा भूतिर्बीजमेतन्निधीयते॥ देवाश्चैतामृषयश्च

27

तेजःसमभरन्महत्॥देवामनुष्यानब्रुवन्नेषावोजननीपुनः॥नापुत्रस्यलो
कोस्तीतितत्सर्वेपशवोविदुः॥तस्मात्तुपुत्रोमातरंस्वसारंचाधिरोह
ति॥एषपंथाउरुगायःसुशेवोयंपुत्रिणआक्रमंतेविशोकाः॥तं
पश्यंतिपशवोवयांसिचतस्मात्तेमात्रापिमिथुनीभवंतीतिहस्माआ
ख्याय॥१३॥अथैनमुवाचवरुणंराजानमुपधावपुत्रोमेजायतां
तेनत्वायजाइतितथेतिसवरुणंराजानमुपससारपुत्रोमेजायतांते
नत्वायजाइतितथेतितस्यहपुत्रोजज्ञेरोहितोनामतंहोवाचाजनिवै

तेपुत्रोयजस्वमानेनेनेतिसहोवाचयदावैपशुर्निर्दशोभवत्यथसमेध्योभवति
निर्दशोन्वस्त्वथत्वायजाइतितथेतिसहनिर्दशआसतंहोवाचनिर्दशोन्व
भूद्यजस्वमानेनेनेतिसहोवाचयदावैपशोर्दंताजायंतेथसमेध्योभवतिदंता
न्वस्यजायंतामथत्वायजाइतितथेतितस्यहदंताजज्ञिरेतंहोवाचाज्ञतवाअ
स्यदंतायजस्वमानेनेनेतिसहोवाचयदावैपशोर्दंताःपद्यंतेथसमेध्योभवति
दंतान्वस्यपद्यंतामथत्वायजाइतितथेतितस्यहदंताःपेदिरेतंहोवाचापत्स
तवाअस्यदंतायजस्वमानेनेनेतिसहोवाचयदावैपशोर्दंताःपुनर्जायंतेथस

मेध्योभवतिदंतान्वस्यपुनर्जायंतामथत्वायजाइतितथेतितस्यहदंताःपुनर्जज्ञिरे
तंहोवाचाज्ञतवाअस्यपुनर्दंतायजस्वमानेनेतिसहोवाचयदावैक्षत्रियःसान्ना
हुकोभवत्यथसमेध्योभवतिसन्नाहंनुप्राप्नोत्वथत्वायजाइतितथेतिसहसंन्ना
हंप्रापतंहोवाचसन्नाहंनुप्राप्नोद्यजस्वमानेनेतिसतथेत्युक्त्वापुत्रमामंत्रयामा
सततायंवैमह्यमिमंत्वामददाद्धंतत्वयाहमिमंयजाइतिसहनेत्युक्त्वाधनुरादाया
रण्यमुपातस्थौससंवत्सरमरण्येचचार॥१४॥ ॥अथहैक्ष्वाकंवरुणोजग्राहत
स्यहोदरंजज्ञेतदुहरोहितःशुश्रावसोरण्याद्ग्राममेयायतमिंद्रःपुरुषरूपेणपर्ये
त्योवाच॥नानाश्रांतायश्रीरस्तीतिरोहितशुश्रुमपापोनृषद्वरोजनइंद्रइच्चरतः

ति

सखाचरैवेतिचरैवेतिवैमाब्राह्मणोवोचदिह॥ द्वितीयंसंवत्सरमरण्येचचार
सोरण्याद्ग्राममेयायतमिंद्रःपुरुषरूपेणपर्येत्योवाच॥ पुष्पिण्यौचरतोजं
घेभूष्णुरात्माफलग्रहिः॥ शेरेस्यसर्वेपाप्मानःश्रमेणप्रपथेहताश्चरैवेतिच
रैवेतिवैमाब्राह्मणोवोचदितिह॥ तृतीयंसंवत्सरमरण्येचचारसोरण्याद्ग्रा
ममेयायतमिंद्रःपुरुषरूपेणपर्येत्योवाच॥ आस्तेभगआसीनस्योर्ध्वस्तिष्ठतिति
ष्ठतः॥ शेतेनिपद्यमानस्यचरातिचरतोभगश्चरैवेतिचरैवेतिवैमाब्राह्मणो
वोचदितिह॥ चतुर्थंसंवत्सरमरण्येचचारसोरण्याद्ग्राममेयायतमिंद्रःपुरुष

रूपेणपर्येत्योवाच॥कलिःशयानोभवतिसंजिहानस्तुद्वापरः॥उत्तिष्ठंस्त्रेताभवति
कृतंसंपद्यतेचरंश्चरैवेतिचरैवेतिवैमाब्राह्मणोवोचदितिह॥पंचमंसंवत्सरमर
ण्येचचारसोरण्याद्ग्राममेयायतमिंद्रःपुरुषरूपेणपर्येत्योवाच॥चरन्वैमधुवि
दंतिचरन्स्वादुमुदुंबरं॥सूर्यस्यपश्यश्रेमाणंयोनतंद्रयतेचरंश्चरैवेति
चरैवेतिवैमाब्राह्मणोवोचदितिह॥षष्ठंसंवत्सरमरण्येचचारसोजी
गर्त्तंसौयवसिमृषिमशनयापरीतमरण्यउपेयायतस्यहत्रयःपु
त्राआसुःशुनःपुच्छःशुनःशेपःशुनोलांगूलइतितंहोवाचऋषे

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के
हंतेशतंददाम्यहमेषामेंनात्मानंनिष्क्रीणाइतिसज्येष्ठंपुत्रंनिगृह्णानउवाच
नत्विममितिनोएवेममितिकनिष्ठंमातातौहमध्यमेसंपादयांचक्रतुःशु
नःशेपेतस्यहशतंदत्त्वासतमादायसआरण्याद्ग्राममेयायसपितरमेत्यो
वाचततहंताहमनेनात्मानंनिष्क्रीणाइतिसवरुणंराजानमुपससा
रानेनत्वायजाइतितथेतिभूयान्वैब्राह्मणःक्षत्रियादितिवरुणउ
वाचतस्माएतंराजसूयंयज्ञक्रतुंप्रोवाचतमेतमभिषेचनीयेपुरु
षंपशुमालेभे॥१८॥तस्यहविश्वामित्रोहोतासीज्जमदग्निरध्वर्युर्व

१७

सिष्ठोब्रह्मायास्यउद्गातातस्माउपाकृतायनियोक्तारंनविविदुःसहोवाचाजीगर्त्तः
सौयवसिर्मह्यमपरंशतंदत्ताहमेनंनियोक्ष्यामीतितस्माअपरंशतंददुस्तंसनिनि
योजतस्माउपाकृतायनियुक्तायाप्रीतायपर्यग्निकृतायविशसितारंनविविदुःसहो
वाचाजीगर्त्तःसौयवसिर्मह्यमपरंशतंदत्ताहमेनंविशसिष्यामीतितस्माअपरंश
तंददुःसोऽसिंनिःशानएयायाथहशुनःशेपईक्षांचक्रेमानुषमिववैमाविशसिष्यंति
ताहंदेवताउपधावामीतिसप्रजापतिमेवप्रथमंदेवतानामुपससारकस्यनूनंकत
मस्यामृतानामित्येतयर्चातंप्रजापतिरुवाचाग्निर्वैदेवानांनेदिष्ठस्तमेवोपधावेति

१७

सोग्निमुपससाराग्नेर्वयंप्रथमस्यामृतानामित्येतयर्चातमग्निरुवाचस
वितावैप्रसवानामीशेतमेवोपधावेतिससवितारमुपससाराभित्वादे
वसवितरित्येतेनतृचेनतंसवितोवाचवरुणायवैराज्ञेनियुक्तोसितं
मेवोपधावेतिसवरुणंराजानमुपससारात उत्तराभिरेकत्रिंशतातं
वरुण उवाचाग्निर्वैदेवानांमुखंसुहृदयतमस्तंनुस्तुह्यथत्वोत्स्रक्ष्या
मइतिसोग्निंतुष्टावात उत्तराभिर्द्वाविंशत्यातमग्निरुवाचविश्वान्नुदे

35

१८

वान्स्तुह्यथत्वोत्स्रक्ष्यामइतिसविश्वान्देवांस्तुष्टावनमोमहद्भ्योनमोअ
र्भकेभ्यइत्येतयर्चातंविश्वेदेवाऊचुरिंद्रोवैदेवानामोजिष्ठोबलिष्ठःस
हिष्ठःसत्तमःपारयिष्णुतमस्तंनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसइंद्रंतु
ष्टावयच्चिद्धिसत्यसोमपाइतिचैतेनसूक्तेनोत्तरस्यचपंचदशभि
स्तस्माइंद्रस्तूयमानःप्रीतोमनसाहिरण्यरथंददौतमेतयाप्रती
यायशश्वदिंद्रइतितमिंद्रउवाचाश्विनौनुस्तुह्यथत्वोत्स्रक्ष्यामइति

१८

सोश्विनौतुष्टावतउत्तरेणतृचेनतमश्विनाऊचतुरुषसंनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसउ
षसंतुष्टावतउत्तरेणतृचेनतस्यहस्मर्च्यृच्युक्तायांविपाशोमुमुचेकनीयऐक्ष्वाकस्योदरं
मुमुचे
भवत्युत्तमस्यामेवर्च्युक्तायांविपाशोगदऐक्ष्वाकआस॥१६॥ ॥तमृत्विजऊचुस्त्वमेवनो
स्याह्नःसंस्छामधिगछेत्यथहैतंशुनःशेपोजःसवंददर्शतमेताभिश्चतसृभिरभिसुषाव
यच्चिद्धित्वंगृहेगृहइत्यथैनंद्रोणकलशमभ्यवनिनायोछिष्टंचम्वोर्भरेत्येतयर्चाथहा
स्मिन्नन्वारब्धेपूर्वाभिश्चतसृभिःसस्वाहाकाराभिर्जुहवांचकाराथैनमवभृथमभ्यव
निनायत्वंनोअग्नेवरुणस्यविद्वानित्येताभ्यामथैनमतऊर्ध्वमग्निमाहवनीयमुपस्थाप
यांचकारशुनश्चिछेपंनिदितंसहस्रादित्यथहशुनःशेपोविश्वामित्रस्यांकमाससादसहो

37

१९ वाचाजीगर्तःसौयवसिर्ऋषेपुनर्मेपुत्रंदेहीतिनेतिहोवाचविश्वामित्रोदेवावाइमंमह्यम
रासतेतिसहदेवरातोवैश्वामित्रआसतस्यैतेकापिलेयबाभ्रवाःसहोवाचाजीगर्तः
सौयवसिस्त्वंवेहिविह्वयावहाइतिसहोवाचाजीगर्तःसौयवसिरांगिरसोजन्मना
स्याजीगर्तिःश्रुतःकविः॥ऋषेपैतामहात्तंतोर्मापगाःपुनरेहिमामितिसहोवाचशुनः
शेपोदर्शुस्त्वाशासहस्तंनयच्छूद्रेष्वलप्सत॥गवांत्रीणिशतानित्वमवृणीथामदंगि
रइतिसहोवाचाजीगर्तःसौयवसिस्तद्वैमातातनपतिपापंकर्ममयाकृतं॥तदहंनि
ह्नुवेतुभ्यंप्रतियंतुशतागवामितिसहोवाचशुनःशेपोयःसकृत्पापकंकुर्यात्कुर्यादे
नत्ततोपरं॥नापागाःशौद्रान्न्यायादसंधेयंत्वयाकृतमित्यसंधेयमितिहविश्वामित्रः

पपपाद्सहोवाचविश्वामित्रोभीमएवसौयवसिःशासेनविशिशासिषुः॥अस्थान्मे
तस्यपुत्रोभूर्ममैवोपेहिपुत्रतामितिसहोवाचशुनःशेपःसवैयथानोज्ञपयाराजपु
त्रतथावद॥यथैवांगिरसःसन्नुपेयांतवपुत्रतामितिसहोवाचविश्वामित्रोज्येष्ठो
मेत्वंपुत्राणांस्यास्तवश्रेष्ठाप्रजास्यात्॥उपेयादैवंमेदायंतेनवैत्वोपमंत्रयइतिस
होवाचशुनःशेपःसंज्ञानानेषुवैब्रूयात्सौहार्दायमेश्रियै॥यथाहंभरतऋषभो
पेयांतवपुत्रतामित्यथहविश्वामित्रःपुत्रानामंत्रयामासमधुछंदाःशृणोतनऋ
षभोरेपुष्टकः॥येकेचभ्रातरस्थनास्मैज्यैष्ठायकल्पध्वमिति॥१७॥ ॥तस्यहवि

39

श्वामित्रस्यैकशतंपुत्रा आसुःपंचाशदेवज्यायांसोमधुछंदसःपंचाशत्कनीयांसस्तद्येज्या
यांसोनतेकुशलंमेनिरेतानंनुव्याजहारांतान्वःप्रजाभक्षीष्टेतितएतेंध्राःपुंड्राःशब
राःपुलिंदामूतिबाइत्युदंत्याबहवोभवंतिवैश्वामित्रादस्यूनांभूयिष्ठाःसहोवाचमधुछं
दाःपंचाशतासार्धंयन्नःपितासंजानीतेतस्मिंस्तिष्ठामहेवयं॥पुरस्त्वासर्वेकुर्महेत्वाम
न्वंचोवयंस्मसीत्यथहविश्वामित्रःप्रतीतःपुत्रांस्तुष्टावतेवैपुत्राःपशुमंतोवीरवंतो
भविष्यथ॥येमानंमेनुगृण्हंतोवीरवंतमकर्तमा॥पुरएत्रावीरवंतोदेवरातेनगाथि
नाः॥सर्वेराध्यास्थपुत्राएषवःसद्विवाचनं॥एषवःकुशिकावीरोदेवरातस्तमन्वित॥
युष्मांश्चदायंमउपेताविद्यांयामुचविमसि॥तेसम्यंचोवैश्वामित्राःसर्वेसाकंस

रातयः॥ देवरातायतस्थिरे धृत्यै श्रेष्ठ्याय गाथिनाः॥ अधीयत देवरातो रि
क्थयोरुभयोरृषिः॥ जन्हूनां चाधिपत्ये दैवे वेदे च गाथिनां॥ तदेतत्पर
ऋक्शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेभिषिक्ताया चष्टे हिरण्यक
शिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति यशो वै हिर
ण्यं यशसैवैनं तत्समर्द्धयत्योमित्यृचः प्रतिगर एवं तथेति गाथाया ओमि
ति वै दैवं तथेति मानुषं दैवेन चैवैनं तन्मानुषेण च पापादेनसः प्रमुंचति
तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैव तच्छौनःशे
पमाख्यानं न हास्मिंनल्पं चनैनः परिशिष्यते सहस्रमाख्यात्रे दद्याच्छ
तं प्रतिगरित्र एते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हाप्याख्या

२१ ज२

पयेरँल्लभंते ह पुत्रान्लभंते ह पुत्रान् ॥१८॥ त्रयस्त्रिंशोध्यायः ॥ ॐ ॥
॥ प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे
अनु द्वय्यः प्रजा असृज्यंत हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्ष
त्रमन्वहुतादः एता वै प्रजा हुतादो यद्ब्राह्मणा अथैता अहुतादो यद्रा
जन्यो वैश्यः शूद्रस्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्षत्रे अन्वैतां यान्येव
ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद्यानि क्षत्रस्य तैः क्षत्रमेतानि वै ब्रह्मण आ
युधानि यद्यज्ञायुधान्यथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व
तं क्षत्रमनन्वाप्य न्यवर्ततायुधेभ्यो ह स्मास्य विजमानः पराङ्वेत्यथैनं ब्र
ह्मान्वैत्तमाप्नोत्तमाप्त्वा परस्तान्निरुध्यातिष्ठत्स आप्तः परस्तान्निरुद्धस्तिष्ठंज्ञा २१

त्वास्वान्यायुधानि ब्रह्मोपावर्त्तीत तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रति
ष्ठितोथैन क्षत्रमन्वागछत्तदब्रवीदुप मास्मिन्यज्ञे ह्वयस्वेति तत्तथेत्यब्रवी
त्तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वाय
ज्ञमुपावर्त्तस्वेति तथेति तत्क्षत्रं निधाय स्वान्यायुधानि ब्रह्मण एवायु
धैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्त्तीत तस्माद्धाप्येतर्हि क्षत्रियो
यजमानो निधायैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्र
ह्म भूत्वा यज्ञमुपावर्त्तते। ॥ १९ ॥ अथातो देवयजनस्यैव याच्ञ्यस्तदा
हुर्यद्ब्राह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं याच

स्नप०
॥२२॥

तिकंक्षत्रियोयाचेदितिदैवंक्षत्रंयाचेदित्याहुरादित्योवैदैवंक्षत्रमादित्यए
षांभूतानामधिपतिःसयदहर्दीक्षिष्यमाणोभवतितदहःपूर्वाह्णएवो
द्यंतमादित्यमुपतिष्ठतेइदंश्रेष्ठंज्योतिषांज्योतिरुत्तमं।देवसवितर्देवय
जनंमेदेहिदेवयज्यायाइतिदेवयजनंयाचतिसयत्तत्रयाचितउत्तरांस
पीत्योंनतथाददामीतिहैवतदाहतस्यहनकाचनरिष्टिर्भवतिदेवेनसवि
त्राप्रसूतस्योत्तरोत्तरिणींहश्रियमश्नुतेश्नुतेहप्रजानामैश्वर्यमाधि
पत्यंयएवमुपस्थाययाचित्वादेवयजनमध्यावसायदीक्षतेक्षत्रियः
सन्॥२०॥अथातदृष्टापूर्त्तस्यापरिज्यानिःक्षत्रियस्ययजमानस्य

॥२२॥
रामू

सपुरस्ताद्दीक्षायाआहुतिंजुहुयाच्चतुर्गृहीतमाज्यमाहवनीयइष्टापूर्त्तस्याप
रिज्यान्यैपुनर्नइंद्रोमघवाददातु।ब्रह्मपुनरिष्टंपूर्त्तंदात्स्वाहेत्यथानूबंध्या
यैसमिष्टयजुषामुपरिष्टात्पुनर्नोअग्निर्जातवेदाददातु।क्षत्रंपुनरिष्टंपू
र्त्तंदात्स्वाहेतिसैषेष्टापूर्त्तस्यापरिज्यानिःक्षत्रियस्ययजमानस्यैदेतेआहु य८
तीतस्मादेतेहोतव्ये।२१।तदुहस्माहसौजातआराळ्हिरजीतपुनर्वण्यं
वाएतद्यदेतेआहुतीइतियथाहकामयेततथैतेकुर्याद्यइतोनुशासनं
कुर्यादितीमेहेवंजुहुयाद्ब्रह्मप्रपद्येब्रह्ममाक्षत्राद्गोपायतुब्रह्मणेस्वा

45

थेरा प्रप

स०प० हेतितन्नदितीं: ब्रह्मवाएषप्रपद्यतेयोयज्ञंप्रपद्यतेब्रह्मवैयज्ञोयज्ञादुहवाएष
॥२३॥ पुनर्जायतेयोदीक्षतेतंब्रह्मप्रपन्नंक्षत्रंनपरिजिनातिब्रह्ममाक्षत्राद्गो
पायत्वित्याहयथैनंब्रह्मक्षत्राद्गोपायेद्ब्रह्मणेस्वाहेतितदेनंप्रीणातितदे
नंप्रीतंक्षत्राद्गोपायत्यथानुवैध्यायेसमिष्ययजुषामुपरिष्टात्क्षत्रंप्रपद्ये
क्षत्रंमाब्रह्मणोगोपायतुक्षत्रायस्वाहेतितन्नदितीं: क्षत्रंवाएषप्रप
यतेक्षत्रंहिराष्ट्रंतंक्षत्रंप्रपन्नंब्रह्मनपरिजितिक्षत्रंमाब्रह्मणोगोपा ना
यत्वित्याहयथैनंक्षत्रंब्रह्मणोगोपायेत्क्षत्रायस्वाहेतितदेनंप्रीणाति ॥२३॥
नदेनंप्रीतंब्रह्मणोगोपायतिसैषाप्रत्तिस्यैवापरिज्यानिः ।क्षत्रियस्य. राम्

मेवपूर्वाह्णउपसदमुपायंस्तयैवैनानह्नोनुदंतयामपराह्णेतयारात्रैस्तांस्तथोभाभ्यां
महोरात्राभ्यामंतरायंस्तस्मात्पूर्वाह्णएवंपूर्वयोपसदाप्रचरितव्यंस्वपराह्णेपरयाना
वंतमेवतद्द्विषतेलोकंपरिशिनष्टि॥२३॥ ॥जितयोवैनामैतायदुपसदोसपत्नांवाएताभि
र्देवाविजितिंव्यजयंतासपत्नांविजितिंविजयतेयएवंवेदयांदेवाएषुलोकेषुयामृतुषुयां
मासेषुयामर्द्धमासेषुयामहोरात्रयोर्विजितिंव्यजयंततांविजितिंविजयतेयएवंवेदते
देवाअबिभयुरस्माकंविप्रेमाणमन्विदमसुराआभविष्यंतीतितेव्युत्क्रम्यामंत्रयंताग्नि
र्वसुभिरुदक्रामदिंद्रोरुद्रैर्वरुणआदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेतथाव्युत्क्रम्यामंत्रयं

47

तेब्रुवन्नृतयाएवंनइमाःप्रियतमास्तन्वस्ताअस्यवरुणस्यराज्ञोगृहेसंनिदधामहैताभिरे
वनःसनसंगच्छातैयोनएतदतिक्रामाद्यश्चालुलोभयिषादितितथेतितेवरुणस्यराज्ञो
गृहेतनूःसंन्यदधततेयद्वरुणस्यराज्ञोगृहेतनूःसंन्यदधततत्तानूनप्त्रमभवत्तत्ता
नूनप्त्रस्यतानूनप्त्रत्वंतस्मादाहुर्नसतानूनप्त्रिणेद्रोग्धव्यमितितस्माद्विदमसु
रानान्वाभवंति॥२४॥ ॥शिरोवाएतद्यज्ञस्ययदातिथ्यंग्रीवाउपसदःसमानवाइषीका
वतःसमानंहिशिरोग्रीवाभिषुंवाएतांदेवाःसमस्कुर्वतयदुपसदःस्तस्याअग्निरनीक
मासीत्सोमःशल्योविष्णुःतेजनंवरुणःपर्णाग्नितामाज्यधन्वानोव्यसृजंस्तयापुरो

मिंहंतआयंतस्माद्धेताआज्यहविषोभवंतिचतुरोग्रेस्तनान्व्रतमुपैत्युपसत्सुचतुःसंधिरि
षुरनीकंशल्यस्तेजनंपरार्णित्रीन्स्तनान्व्रतमुपैत्युपसत्सुत्रिषंधिरिषुरनीकंशल्यस्ते
जनं॥द्वौस्तनौव्रतमुपैत्युपसत्सुद्विषंधिरिषुःशल्यश्चैवतेजनंचैकंस्तनंव्रतमुपै
त्युपसत्स्वेकाध्येवेषुरिसारव्यायतनेएकयावीर्यंक्रियतेपरोवरीयांसोवाइमेलोकाअर्व
गंहीयांसःपरस्तादर्वाचीरुपसदउपैत्येषामेवलोकानामभिजित्यैउपसद्यायमीढु
षद्गमांमेअग्नेसुमिधंमिमातुपसद्वनेरितितिस्वःस्तिस्वःसामिधेन्योरूपसमद्धौराम
हैयज्ञस्यसमद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणामृगाभिवदतिजघ्निवतीयाज्यानुवा

कुर्याद्दग्निर्हवाग्निं जघन यत्तु पद्वशर्युद्दीतं सोमासि समन्तिगय स्फानौ श्रमीवर्हिदं धिष्टु
रिन क्रमेश्रीणि पदा विचक्रमद्दसेना विपर्यस्ताभिरपराह्णे यजति प्रंतो वा एताभिर्द्देवाः
पुरोभिर्द्दन्त आयन्यद्दुपसदः सर्वेह सं कृतं व्यान विछंदसो पद्दिषंदसः कुर्याद्धीवासत
ऽउद्दध्यारी श्वरोग्लावोजनितोस्तस्मात्सछंद स एव कृतं व्यान विछंदसं स्तुद्दस्मारोप
विर्जीन श्रतेयत्तुपसदां किल वैन द्वास्नणीयस्माद्दपश्लीलस्य श्रोत्रियस्य मुखं वैर्गस व
यतेन्द्र ममिवरेमतीवे साऽज्यहविषौ ह्युपसदोभीवासु त्रुमुखमध्याद्दितं तस्माद्दुस्मतस्य
।।२१।। ।।देववर्म वा एतद्ध प्रयाजाश्चानुयाजाश्चाप्रजैपोमन्नुनुयाजं भवतीषै संशिसा

अथतिशृतायसहूहतिक्रम्याश्रावयतियदस्यामित्रंसोअनपक्रमायततस्माद्दुःक्रूरमिववा
एतत्सोमस्यराज्ञोंतेचरंतियदस्यघृतेनांतेचरंतिघृतेनहिवज्रेणेंद्रोवृत्रमहंस्तषदं
शुरंशुष्टेदेवसोमाप्यायतामिंद्रायैकधनविदआतुभ्यमिंद्रःप्यायतामात्वमिंद्रायप्या
यस्वाप्याययास्मान्सखीन्त्सन्यामेधयास्वस्तितेदेवसोमसुत्यामुदृचमशीयेतिराजा
नमाप्याययंतियदेवास्यतत्क्रूरमिवांतेचरंतितदेवास्यैतेनाप्याययंसयोएनंवर्द्धयंवे
वद्यावापृथिव्योर्वाएषगर्भोयत्सोमोराजातंधहैद्वारायएलावामानिप्रेषेन्नगायगाःत्र
नम्हलवाहिस्योनमोदिवेनमःपृथिव्याइतिप्रस्तरेनिन्हुवतेद्यावा[illegible]थिवीभ्यामेव॥

KKSU LIBRARY
RAMTEK
441 106
M-1891
Dist Nagpur

51

॥२६॥

न्नमस्कुर्वंस्य पोप्नेवर्द्धयंसेववर्द्धयंसेवा॥२६॥ ॥इति प्रथमपंचिकायांचतुर्थोऽध्यायः॥
हरिःऽओम्॥ ॥सोमोवैराजागंधर्वेष्वासीत्तंदेवाश्चऋषयश्चाभ्यध्यायन्कथमयमस्मान्सो
मोराजागच्छेदितिसावागब्रवीत्स्त्रीकामावैगंधर्वामयैवस्त्रियाभूतयापणध्वमितिनेति
देवाअब्रुवन्कथंवयंत्वदृतेस्यामेतिसाब्रवीत्क्रीणीतैवयर्हिवाववोमयार्थोभविता
तर्ह्येववोऽहंपुनरागंतास्मीतितथेतितयामहानग्न्याभूतयासोमंराजानमक्रीणंस्तामभि
कृतिमस्कन्नांवत्सतरीमाजंतिसोमक्रयणींतयासोमंराजानंक्रीणंतितांपुनर्निष्क्रीणीया
त्पुनर्हिसातानागच्छत्तस्मादुपांशुवाचाचरितव्यंसोमेराजनिक्रीतेगंधर्वेषुहितर्हिवा

२६

गमयति साम्ना वेवं प्रणीयमाने पुनरागछति ॥२७॥ ॥अग्नये प्रणीयमानायानुब्रूहीत्या
हाध्वर्युः प्रैदं देवं देव्या धिया भरता जातवेदसं ॥ इत्यानोवस्हतानुष्टुभिति गायत्रीं ब्राह्म
णस्यानुब्रूयाद्गायत्रो वै ब्राह्मणस्तेजो वै ब्रह्मवर्चसं गायत्री तेजसैवैनं तद्ब्रह्मवर्चसेन
समर्द्धयतीमं महे विदथ्याय शूषमिति त्रिष्टुभं राजन्यस्यानुब्रूयात्त्रैष्टुभो वै राजन्य ओजो
वा इंद्रियं वीर्यं त्रिष्टुबोजसैवैनं तदिंद्रियेण वीर्येण समर्द्धयति शश्वत्कृत्व ईड्याय प्र
जभ्रुरिति स्वानामेवैनं तच्छ्रैष्ठ्यं गमयति शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यै
रस्त्रैजैऽ सोजरसं हास्मिन्नजस्रो दीदाय य एवं वेदायमिह प्रथमो धायि धातृभिरिति

र्छ

जगतीवैश्यस्यानुब्रूयाज्जागतोवैवैश्योजागताःपशवःपशुभिरेवैनंतत्समर्द्धयतिवनेषुनि
त्रंविमिन्वंविशोविशाड्स्यभिरूपायवैमिलैरूपंतत्समृद्धमथमुखमदेवसुरिस्यनुष्टुभिवाचं
विसृजतेवाग्वाअनुष्टुप्वाच्येवैतद्वाचंविसृजतेयमुष्यइतियदाहायमुस्यांगमेयापु
रांगंचवैषवावसमिसेवैतद्वाक्प्रभूतेयमभिरुरुध्यतीसयंवाअभिरुरुध्यसमत्ताधि
वजन्मनरसमृतत्वमेवास्मिंस्तद्दधातिसहस्रभिस्तहीयाद्देवोजीवानवेहतइतिवै
वोह्येषएतज्जीवानवेहतोयहभिरिद्धायास्तापदेवयंनामाहपथिव्याअचीसेतद्वाइअ
यास्पदेयेदुत्तरवेदीनाभिजातवेदोनिचीमहीतिनिचायस्यंतोह्येनंमवंसमेहव्यायवे

र्छ

चित्र २

क्र वह्निर्ह्यं हि वक्ष्यन्भवत्यग्ने विश्वेभिः स्वनीक देवैरूर्णावंतं प्रथमः सीद योनिमिति
विश्वैरेवैनं तद्देवैः सह सादयति कुलायिनं घृतवंतं सवित्र इति कुलायमिव ह्येतद्यज्ञे
क्रियते यसैतुदारवाः परिधयो गुगुल्लूर्णास्तुकाः सुगंधितेजनानीति यज्ञं नय यजमा
नाय साध्विति यज्ञमेव तदृजुधा प्रतिष्ठापयति सीद होतः स्व उ लोके चिकित्वानित्यग्नि
र्वै देवानां होता तस्यैषः स्वो लोको यदुत्तरवेदीनाभिः सादया यज्ञं सुकृतस्य योनाविति
यजमानो वै यज्ञो यजमानायैवैतामाशिषमाशास्ते देवावीर्देवान्हविषा यजास्यग्ने बृह
द्यजमाने वयो धा इति प्राणो वै वयः प्राणमेव तद्यजमाने दधाति नि होता होतृषदने वि

55.

२०

दानइत्यग्निर्वैदेवानांहोतातस्यैतद्धोतृषदनंयदुत्तरवेदीनाभिस्त्वेषोदीदिवांअसदत्सुदक्ष
इत्यासन्नोहिसतर्हिभवत्यदब्धव्रतप्रमतिर्वसिष्ठइत्यग्निर्वैदेवानांवसिष्ठःसहस्रंभरःशु
चिजिह्वोअग्निरित्येषह्यस्यसहस्रंभरतायदेनमेकंसंतंबहुधाविहरंतिप्रहवैसाह
स्रंपोषमाप्नोतियएवंवेदत्वंदूतस्त्वमुनःपरस्पाइत्युत्तमयापरिदधातित्वंवस्यआवृषभ
प्रणेता॥अग्नेतोकस्यनस्तनेतनूनामप्रयुच्छंदीद्यद्बोधिगोपाइत्यग्निर्वैदेवानांगोपाअ
ग्निमेवतत्सर्वतोगोप्तारंपरिदत्तआत्मनेचयजमानायचयएवंविद्वानेतयापरिदधात्य
धोसंवत्सरीणामेवैतांस्वस्तिंकुरुतेताएताअष्टावन्वाहरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धं

२०

यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संप
द्यंते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभीराध्नोति य
एवं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाय
२९॥ ॥हविर्धानाभ्यां प्रोह्यमाणाभ्यामनुब्रूहीत्याह युंजे वां ब्रह्म पूर्व्यं नमोभिरित्य
न्वाह ब्रह्मणा वा एते देवा अयुंजत यद्विद्वाने ब्रह्मणैव वैने एतद्युङ्क्ते न वै ब्रह्मण्वद्रिष्य
ति प्रेतां यज्ञस्य शंभुवेति तच्चं द्यावापृथिवीयमन्वाहैतद्धुर्यद्धविर्धानाभ्यां प्रोह्यमाणा
भ्यामनुवाचाह यत्कस्मात्तच्चं द्यावापृथिवीमन्वाहेति द्यावापृथिवी वै देवानां हविर्धाने आ

य

57

२४

स्तो तेउ एवा द्यापिहृवि वीनेते ह्मीदमंतरेणा सर्वं ह्य विर्यदिदं किंचं तस्मात्त्वं द्यावाहृथिवी ऽसमन
दुषमेड्वयजमाने यद्दैनमिजियमेड्वह्मतेयजमाने प्रवाहृगितः प्रवांमरन्मानुषा देवयंतम्
ति देवयंतो ह्येने मानुषाः प्रमरंस्यासीदर्तं स्वमुलोकं विहाने स्यासस्थे मवतमिं दवेन इति सो
मो वै राजेंद्वः सोमायै वै ने एतद्वाइत्थासदे चीक्लृपंदेचिद्वयोरदयाउ ब्ध्यंवच इति दृयाष्टैत
न्नतीयं छदिरधिनिधीयतउ ब्ध्यंवच इति यदाद्यद्छियं वैकुर्मो ब्ध्यंवचो यज्ञमेवैतेन स
मर्द्धयति यतः स्रुचा मिथुनायासपर्यंतःाब्म संयतो ब्रतेनेद्वेति पुष्पतीति यदेवादः पूर्वं यतव
सदमाहृतदेवैतेन शांसा शमयति मदृशक्ति यंजमानायस्वतद्याशिषमाशास्ते विष्णा

२४

रूपाणिप्रतिमुंचतेकविरितिविश्वरूपामन्वाहसरराट्यामीक्षमाणोनुब्रूयाद्विश्वमिवहिरूपं
रराट्याःशुक्लमिवचकृष्णमिवचविश्वंरूपमवरुंधआत्मनेचयजमानायचयत्रैवंविद्वानेतं
रराट्यामीक्षमाणोन्वाहपरित्वागिर्वणोगिरइत्युत्तमयापरिदधातिसयद्दैवहविद्वानेसंप
रिश्रितेमन्येनापपरिदध्यादग्नैनेमानुकाहहोतुश्चयजमानस्यचभार्यामवंतियत्रैवंविद्वा
नेतयाहविर्धानयोःसंपरिश्रितयोःपरिदध्यादितियज्ञुपावाएतेसंपरिश्रियेतेयद्धविर्द्धा
नेयजुषैवैनेएतसरिश्रयंतितौयदेवाध्वर्युश्चप्रतिप्रस्थाताचोन्नयतोमेथ्यौनिहन्यातां
परिदध्यादग्रेहितेसंपरितेभवतस्ताएताअष्टावन्वाहरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धं

श्रि।

३०

यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदतीति तासां त्रिः प्रथमामन्वाह त्रिरुत्तमां ता द्वादश संप
द्यंते द्वादश वै मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभी राध्नोति य ए
वं वेद त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्बर्सौ नह्यति स्थेम्ने बलायाविस्रंसाया ॥ २९
॥ अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीत्याहाध्वर्युः सावीर्हि देव प्रथमाय पित्र इति सावि
त्रीमन्वाह तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्यामनुवाचाहाथ कस्मात्सावित्रीमन्वाहेति
सविता वै प्रसवानामीशे सवितृप्रसूता एवैनौ तत्प्रणयंति तस्मात्सावित्रीमन्वाह प्रैतु ब्रह्म
णस्पतिरिति ब्राह्मणस्पत्यामन्वाह तदाहुर्यदग्नीषोमाभ्यां प्रणीयमानाभ्यामनुवाचाह

३०

यकस्माद्ब्राह्मणस्य साम न्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मैवास्मा एतत्पुरोगवमकः प्रैतु ब्र
ह्मणस्पतिः प्र देव्येतु सूनृतेति स सूनृतमेवैतद्यज्ञं करोति तस्माद्ब्राह्मणस्य साम
न्वाह होता देवो अमर्त्य इति तच्चाग्नेयं गायत्रमन्वाह सोमे राजनि प्रणीयमाने सोमं
वै राजानं प्रणीयमानमन्तरेणैव सदोहविर्धानान्यसुरा रक्षांस्यजिघांसंस्तमग्निर्माय
याऽत्यनयत्पुरस्तादेति माययेति मायया हि स तमत्यनयत्तस्माद्वस्यापि पुरस्ताद्धरन्त्यु
प त्वाग्ने दिवेदिवे उप प्रियं पनिप्नतमिति त्रिष्टुभं चान्वाहेश्वरौ वा एतौ संयन्तौ यजमा
नं हिंसितोर्यश्चासौ पूर्व उद्धृतो भवति यमु चैनमपरं प्रणयन्तीति तद्यत्त्रिष्टुभं चान्वाह सो

61

ऽनानावेवैनौतत्स्वर्गमयंतिशन्तिछायामेवैनौतत्स्मतिछापयंसाअनश्यजमानस्यवाद्विं
सायाः अग्नेजुषस्वप्रतिहर्यतद्वचइत्यानुसंह्रूयमानायामन्वाहाग्नयएवैनंतज्जुष्टिमाहुतिं
गमयतिसोमोजिगातुर्गातुविदितित्वंसौम्यांगायत्रमन्वाहसोमेराजनिप्रणीयमानेस्वयैवै
नंतद्देवतयास्वेनछंदसासमर्द्धयतिसोमःसधस्थमासददित्यासत्यन्हिसन्तर्हिंभवतिनद
तिक्रम्यैवातुश्रूयास्तेछन्तइवाग्नीध्रंसमुत्तमस्यराजावरुणास्तमश्विनेतिवैस्तरीमन्वाह
क्रतुंसर्वतमारुतस्यवेचसः॥ततारद्वस्मुत्तममहविंदंनजंचविष्णुःसरविवाअपोणुत
इतिविष्णुर्वैदेवानांद्वारपःसएवास्माएतद्द्वारंविवृणोतिसंतश्चप्रागाअद्रिलिर्मैवासीतिम

पाद्यमानेन्वाह स्योनोनयोनिंसदनंधियाकृतमित्यासन्ने हिरण्मयमासदंदेवएषतीतिहिरण्म
यमिवह्वाएषएनदेवेभ्यश्छदयतियत्सोमाजिनंतस्मादेतामन्वाहसत्त्वाद्यामरुतोविश्व
वेदाहइतिवारुण्यापरिदधातिवरुणादेवसोवारुणएषतावद्यावदुपनद्धोयावद्धिसेस्मितावि
प्रपद्यतेस्वयैवैनंतद्देवतयास्वेनछंदसासमर्द्धयतितेयद्युपवाधावेयुरमयंवेक्षेरन्नेवा
वंदस्ववरुणांबृहंतमित्येतयापरिदध्याद्यावद्ध्योहामयमिच्छतियावद्ध्योहामयंध्यायति
तावद्ध्योहामयमेवतियद्यैवंविद्वानेतयापरिदधातितस्मादेवंविद्वानेतयैवपरिदध्याता
एताःसप्तदशान्वाहरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृग

३२

मिवदंति तासां त्रिः प्रथमामन्वाहं त्रिरुत्तमां ता एकविंशतिः संपद्यंत एकविंशो वै प्रजाप
तिर्द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश उत्तमा प्रतिष्ठा तद्दैवं क्ष
त्रं सा श्रीस्तदाधिपत्यं तद्ब्रध्नस्य विष्टपं तत्प्रजापतेरायतनं तत्स्वाराज्यमृध्नोति तमे
वैताभिरेकविंशत्यैकविंशत्या ॥३०॥ ॥ इति प्रथमपंचिकायां पंचमोऽध्यायः ॥ ॥
अग्निर्वै षट् ॥ स्वर्गे वै पंच ॥ प्राच्या वै षट् ॥ यज्ञो वै नव ॥ सोमो वै चत्वारि ॥ अग्निर्वै सप
जव द्रुणानां ता दश ॥ ॥ शके १६८१ वर्षे नंदन नाम संवत्सरे श्रावण वद्य द्वादशी
रोज तद्दिने पुस्तकं लिखितं समाप्तं ॥ ॥ रामो जयति ॥ ॥ कृष्णो जयति ॥ सदाशिवार्प
रिव

३२

३३

णामस्तु ॥ ॥ गोपाळकार्पणमस्तु ॥ ॥ उउदूपनाम्ना डोगरभट्टतनूजेन चंद्रपूरनिवा
शिना ॥ लक्ष्मणशर्मणा लिख्यां ॥ ॥ छ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥ छ ॥ छ
ममहस्तकृटिग्रीवा स्तब्धदृष्टिरधोमुखि ॥ कष्टेन लिखितं ग्रंथं यत्नेन परिपा
लयेत् ॥ ॥ यानियदियदायोयंयस्यतस्यहियद्यंथ ॥ अंतियेनामियोयाश्चदृष्टे
दत्तं पदं भवेत् ॥ ॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् ॥ मूर्खहस्तेन दा
तव्यं एवं वदति पुस्तकं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ श्रीराम ॥
॥ छ ॥ ॥ छ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥ ॥ ॥ ॥

"प्रथम पंचिका समाप्त"



२२४४

KKSU LIBRARY
RAMTEK
441 106
M-1891
Dist Nagpur

```
[OrderDescription]
,CREATED=13.10.20 11:40
,TRANSFERRED=2020/10/13 at 11:48:41
,PAGES=67
,TYPE=STD
,NAME=S0003984
,Book Name=M-1891-ETREY BRAHAMAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,
```